# Shri Krishna Mangala Stotram

# श्रीकृष्णमङ्गलस्तोत्रम्

## Document Information

Text title : Shri Krishnamangala Stotram 06 41

File name : kRRiShNamangalastotram.itx

Category : vishhnu, mangala, stotra, krishna

Location : doc_vishhnu

Proofread by : Saritha Sangameswaran

Description/comments : From stotrArNavaH 06-41

Latest update : January 6, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2022

*sanskritdocuments.org*

# श्रीकृष्णमङ्गलस्तोत्रम्

सर्वे वेदाः साङ्गकलापाः परमेण
प्राहुस्तात्पर्येण यदद्वैतमखण्डम् ।
ब्रह्मासङ्गं प्रत्यगभिन्नं पुरुषाख्यं
तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १॥

मायाधिष्ठानं परिशुद्धं यदविद्या
सूते विश्वं देवमनुष्यादिविभेदम् ।
यस्मिन् ज्ञाते सा शशशृङ्गेण समा स्यात्
तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ २॥

श्रीवैकुण्ठे श्रीधरणीलालितपादः
सर्वैर्वै दैर्मूर्तिधरैः संस्तुतकीर्तिः ।
आस्ते नित्यं शेषशयो यः परमात्मा
तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ ३॥

धर्मत्राणायैव कृतानेकविभूतिः
श्वेतद्वीपे क्षीरपयोधौ कृतवासः ।
यो भृत्यानामार्तिहरः सत्त्वसमूह-
स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ ४॥

क्षीराम्भोधेस्तीरमुपाव्रज्य सुरेशै-
र्ब्रह्मेशानेन्द्रादिभिराम्नायशिरोभिः ।
भूमेः सौख्यं कामयमानैः प्रणतो य-
स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ ५॥

सर्वात्मापि स्वाश्रितरक्षापरतन्त्र
इश्रीदेवक्यां यो वसुदेवादवतीर्णः ।
चक्रे लीलाः श्रोतृमनोनन्दविधात्री-
स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ ६॥

पुत्रं मत्वा यं परमेशानमजातं
 पूर्णं मायोपात्तशरीरं सुखरूपम् ।
नन्दो मुक्तिं प्राप यशोदा व्रजपुर्यां
 तस्मै श्रीकृष्णाय नमो ॥ ७॥

गोप्यो गोपा गोपकुमाराश्च यदीयम् । (गोपकुमारापि गावः)
 दृष्ट्वा रूपं सुन्दरमिन्दीवरनीलम् ।
मन्दस्मेरं कुन्दरदं प्रीतिमवापु-
 स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ ८॥

बालो भूत्वा मासवया योऽपिबदग्ने
 प्राणैः साकं स्तन्यमसुर्याः कुलटायाः ।
स्वरस्त्याकाङ्क्षन्नात्मजनानां जगदीश-
 स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ ९॥

पद्भ्यां जघ्नेऽनोऽसुरमुद्यम्य तृतीये
 मासे देवो योऽखिलमायाविनिहन्ता ।
सन्तापघ्नः साधुजनानाममरेश-
 स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १०॥

कण्ठे बद्ध्वा मूर्ध्नि विनिर्भिद्य निरस्तः
 दुष्टो गोष्ठे येन तृणावर्तसुरारिः ।
सर्वज्ञेनानन्तबलेनातिविमूढ-
 स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ ११॥

गोपालार्भैश्चारणलीलां विदधानो
 गोवत्सानां यो बकदैत्यं विददार ।
आस्यादारम्योदरमत्युन्नतसत्त्वं
 तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १२॥
मात्रे दैत्याच्छङ्कितवत्यै दयया यो
 गोप्यै लोकान् स्वात्मसमेतान् मुखपद्मे ।
स्वीये सूक्ष्मेऽदर्शयदव्याहतशक्ति-
 स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १३॥

नव्यं गव्यं क्षीरमनीरं नवनीतं

भुङ्क्ते प्रीत्या दत्तमदत्तं च यथेच्छम् ।
स्वात्मारामाभ्यर्चितपादोऽपि च गोष्ठे
तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १४॥

कालीयोऽहिः कल्पितशिक्षाभयदान-
स्त्यक्त्वा तीर्थं यामुनमात्मीयमवाप ।
द्वीपं येनानन्तबलेनाथ ससैन्य-
स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १५॥

गोपान् योऽपादापद उद्धृत्य दवाग्ने-
र्मुग्धान् स्निग्धान् पवित्रामललक्ष्मीः । (स्वस्य जनावनमूर्तिः)
अष्टैश्वर्योऽव्याहतलक्ष्मीपतिराद्य-
स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १६॥

पापाचारोऽघासुरनामाहिशरीरः
शैलाकारो येन हतो मूर्ध्नि विभिन्नः ।
प्रापात्मैक्यं ब्रह्मविदामेव तु गम्यं
तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १७॥

गोगोपानां श्रोत्रमनोनेत्रसुखानि
प्रादुष्कुर्वन् गोपवधूनां व्रजमध्ये ।
लीलानाट्यान्यद्भुतरूपाणि य आस्ते
तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १८॥

व्यत्यस्ताम्भोजातपदो वेणुनिनादैः
सर्वाँल्लोकान् सातिशयान् कर्मसु मूढान् ।
चक्रेऽत्यन्तानन्दविधानेन वने य-
स्तस्मै श्रीकृष्णाय नमो मङ्गलधाम्ने ॥ १९॥

इति श्रीकृष्णमङ्गलस्तोत्रं सम्पूर्णम् ।

Proofread by Saritha Sangameswaran

*Shri Krishna Mangala Stotram*

pdf was typeset on January 7, 2022

Please send corrections to *sanskrit@cheerful.com*